निष्ठायां अनायासकृतं फाण्टं इत्यमरः ॥ अतएव रमानाथोऽपि घटादौ फण गतौ इत्यत्र गतेरन्यत्र । फाणयति जनोऽनायासेन जनयतीत्यर्थं इत्याह । इति दुर्गादासः ॥

फण, मि ण गतौ । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । ) मि, फणयति फाणयति । ण, फेणतुः पफणतुः । इति दुर्गादासः ॥

फणः, त्रि, ( फनति विस्तृतिं गच्छतीति । फण + अच् । ) सर्पस्य विस्तृतमस्तकम् । यथा । फटायान्तु फणा द्वयोरित्यमरः ॥ शस्त्रोर्णं कारणं फणम् । इति क्लीवकाण्डे चन्द्रगोमी ॥ तत्पर्य्यायः । फणा २ फणम् ३ फटा ४ फटः ५ स्फटः ६ स्फटा ७ । इत्यमरभरतौ ॥ दर्व्वी ८ भोगः ९ स्फुटः १० । इति हेमचन्द्रः ।४।३८१॥ स्फुटा ११ दर्व्विः १२ फटी १३ । इति शब्द-रत्नावली ॥ (यथा, महाभारते ।१२।११४।१५।
"परिवादं ब्रुवाणो हि दुरात्मा वै महाजने ।
प्रकाशयति दोषांस्तु सर्पः फणमिवोच्छ्रितम् ॥"
जत्रूर्द्ध्वस्थमर्म्मविशेषः । यथा, सुश्रुते । ३ । ६ ।
"जत्रूर्द्ध्वं मर्म्माणि चतस्रो धमन्योऽष्टौ मातृकाः द्वे कृकाटिके द्वे विधुरे द्वौ फणौ द्वावपाङ्गौ द्वावावर्त्तौ द्वावुत्क्षेपौ द्वौ शङ्खावेका स्थपनी पञ्च सीमन्ताश्चत्वारि शृङ्गाटकान्येकोऽधिपतिरिति ॥" )

फणकरः, पुं, ( फणः कर इवास्येति । फणस्य करो वा । ) भुजङ्गः । इति शब्दरत्नावली ॥

फणधरः, पुं, ( धरतीति । धृ + अच् । फणस्य धरः । ) सर्पः । इति शब्दरत्नावली ॥

फणधरधरः, पुं, (फणधरस्य सर्पस्य धरः ।) शिवः । इति कविकल्पलता ॥

फणभृत्, पुं, (फणं बिभर्त्तीति । भृ + क्विप् तुक् च ।) सर्पः । इति हेमचन्द्रः । ४ । ३६९ ॥ ( यथा, राजेन्द्रकर्णपूरे । ४ ।
"व्याप्तव्योमतले मृगाङ्कधवले निर्धौतदिङ्मण्डले
देवत्वद्यशसि प्रशान्ततमसि प्रौढ़िं जगत् प्रेयसि ।
कैलासन्ति महीभृतः फणभृतः शेषन्ति पाथोधयः
क्षीरोदन्ति सुरद्विपन्ति करिणो हंसन्ति पुंस्कोकिलाः ॥")

फणवान्, [ त् ] पुं, ( फणोऽस्यास्तीति । फण + मतुप् । मस्य वः ।) सर्पः । इति शब्दरत्नावली ॥

फणा, स्त्री, ( फणति प्रसारसङ्कोचं गच्छतीति । फण गतौ + अच् । टाप् । ) सर्पफटा । इत्यमरः । १ । ८ । ९ ॥ ( यथा, अभिज्ञानशकुन्तले ६ अङ्के ।
"ज्वलति चलितेन्धनोऽग्निर्विप्रकृतः पन्नगः फणां कुरुते ।
तेजस्वी संक्षोभात् प्रायः प्रतिपद्यते तेजः ॥")

फणाकरः, पुं, ( करोतीति । कृ + अच् । फणाया करः । ) सर्पः । इति शब्दरत्नावली ॥

फणाधरः, पुं, ( धरतीति । धृ + अच् । फणाया धरः । ) सर्पः । इति शब्दरत्नावली ॥

फणाभरः, पुं, (बिभर्त्ति धरतीति । भृ + पचाद्यच् । फणाया भरः ।) सर्पः । इति हारावली । १५ ॥

फणावान्, [ त् ] पुं, ( फणास्यास्तीति । फणा + मतुप् । मस्य वः ।) सर्पः । इति शब्दरत्नावली ॥

फणिकेसरं, क्ली, ( फणीव केसरोऽस्य । ) नागकेसरम् । इति राजनिर्घण्टः ॥ ( गुणादयोऽस्य नागकेसरशब्दे ज्ञातव्याः ॥)

फणिखेलः, पुं, ( फणिना सह खेलतीति । खेल + अच् । ) भारतीपक्षी । इति त्रिकाण्डशेषः ॥ भारइ इति भाषा ॥

फणिचक्रं, क्ली, (फण्याकारं चक्रम् ।) विवाहादिकर्म्मसु शुभाशुभज्ञानार्थं सप्तविंशतिनक्षत्रघटितसर्पाकारत्रिनाड़िकचक्रम् । यथा,—
"अश्विन्यादि लिखेच्चक्रं सर्पाकारं त्रिनाड़िकम् ।
तत्र वेधवशाज्ज्ञेयं विवाहादौ शुभाशुभम् ॥
त्रिनाड़ीवेधनक्षत्रमश्विन्यार्द्राशुगोत्तराः ।
हस्तेन्द्रमूलवारुण्यः पूर्व्वभाद्रपदास्तथा ॥
याम्यः सौम्यो गुरुर्योनिश्चित्रा मित्रजलाश्रयम् ।
धनिष्ठा चोत्तरा भाद्रा मध्यनाड़ीव्यवस्थिताः ॥
कृत्तिका रोहिणी सर्पो मघा स्वातीविशाखके ।
उत्तरा श्रवणा पौष्णं पृष्ठनाड़ीव्यवस्थिताः ॥
अश्वादिनाड़ीवेधर्क्षे षष्ठं द्वितीयकं क्रमात् ।
याम्यादितुर्य्यतुर्य्यञ्च कृत्तिकादिद्विषट्ककम् ॥
एवं निरीक्षयेद्वेधं कन्यामन्त्रे गुरौ सुरे ।
पण्यस्त्रीस्वामिमित्रेषु देशे ग्रामे पुरे गृहे ॥
एकनाड़ीस्थधिष्ण्यानि यदि स्युर्व्वरकन्ययोः ।
तदा वेधं विजानीयाद्गुर्व्वादिषु तथैव च ॥
प्रकटं यस्य जन्मर्क्षं तस्य जन्मर्क्षतो वधः ।
प्रनष्टं जन्मभं यस्य तस्य नामर्क्षतो भवेत् ॥
द्वयोर्जन्मभयोर्व्वेधे न कर्त्तव्यं कदाचन ॥
एकनाड़ीस्थिता चेत् स्याद्भर्त्तुर्नाशाय चाङ्गना ।
तस्मान्नाड़ीवधो वीक्ष्यो विवाहे शुभमिच्छता ॥
प्राङ्नाड्या वेधतो भर्त्ता मध्यनाड्यां मयन्तथा ।
पृष्ठनाड़ीवधे कन्या म्रियते नात्र संशयः ॥
एकनाड़ीस्थिता यत्र गुरुर्मन्त्रश्च देवता ।
तत्र द्वेषं रुजं मृत्युं क्रमेण फलमादिशेत् ॥
समासन्ने वधे शीघ्रं दूरवेधे चिरेण तु ।
वेधान्तरप्रमाणेन वर्षे दुःखं प्रजायते ॥
प्रभुः पण्याङ्गना मित्रं देशो ग्रामः पुरं गृहम् ।
एकनाड़ीगता भव्या अभव्या वेधवर्ज्जिताः ।
एकराश्यादियोगे तु नाड़ीदोषो न विद्यते ॥"
इति ज्योतिस्तत्त्वम् ॥

अपि च ।
"सर्पाकारो घटनविशेषः
कृत्तिकादियमदैवतशेषः ।
पृष्ठे सुतहतिसङ्कटरोगः
क्रोड़े कान्तापुत्त्रवियोगः ।
मध्ये रेखे विहितविवाह
उभयोर्म्मरणं वदति वराहः ॥
क्रोड़े पृष्ठे यत्र उद्वाहम्
मध्ये क्रोड़े बहुसम्मानम् ।
मध्ये पृष्ठे भवति विवाहो
बहुसुतवित्तमिति च मुनिराह ॥"
इति समयप्रदीपः ॥*॥

तस्य विन्यासो यथा,—
पृष्ठे १ ६ ७ १२ १३ १८ १९ २४ २५



मध्ये २ ५ ८ ११ १४ १७ २० २३ २६
क्रोड़े ३ ४ ९ १० १५ १६ २१ २२ २७ ॥

फणिजिह्वा, स्त्री, ( फणिजिह्वेव आकृतिरस्यस्या इति अच् । ) महाशतावरी । महासमङ्गा । इति राजनिर्घण्टः ॥

फणिज्झकः, पुं, ( फणिनामुज्झकः वहिष्कारक उत्पादक इति यावत् । पृषोदरादित्वात् साधुः । फणितुल्यबहुपत्रपुष्पवत्त्वात् तथात्वम् । ) क्षुद्रपत्रतुलसी ॥ ( रक्तवर्णतुलसी च । तत्पर्य्यायश्च यथा, वैद्यकरत्नमालायाम् ।
"सुगन्धको गन्धनामा तीक्ष्णगन्धः फणिज्झकः ॥")
जम्बीरभेदः । इति केचित् ॥ जम्बीरसामान्यः । इति केचित् ॥तत्पर्य्यायः । समीरणः २ मरुवकः ३ प्रस्थपुष्पः ४ जम्बीरः ५ । इत्यमरभरतौ ॥ (यथा,—
"मारुतोऽसौ मरुवको मरुन्मकरपि स्मृतः ।
फणी फणिज्झकश्चापि प्रस्थपुष्पः समीरणः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

फणितः, त्रि, ( फण गतौ + क्तः । ) गतः । निःसृतः ॥

फणितल्पगः, पुं, ( फणी शेष एव तल्पं फणितल्पं तस्मिन् गच्छतीति । गम + डः ।) विष्णुः । सर्पशय्यायां गच्छति यः । इति व्युत्पत्तिः ॥

फणिप्रियः, पुं, ( फणिनां प्रियः भक्ष्यत्वात् । ) वायुः । इति शब्दरत्नावली ॥

फणिफेनः, पुं, ( फणिनां फेन इव उग्रगुणत्वात् ।) अहिफेनः । आफिं इति भाषा । यथा,—
"जातीफलं टङ्कणमभ्रकञ्च
हिङ्गूलगन्धं परिमर्द्य यामम् ।
भागद्वयं स्यात् फणिफेनकस्य
शाल्मलिकापत्ररसेन मर्द्दम् ॥"
इति रत्नावली ॥

फणिवल्ली, स्त्री, ( फणीव दीर्घा वल्ली । ) नागवल्ली । इति राजनिर्घण्टः ॥

फणिहन्त्री, स्त्री, ( फणिनो हन्तीति । हन् + तृच् + ङीप् ।) गन्धनाकुली । इति राजनिर्घण्टः ॥

फणिहृत्, स्त्री, ( फणिनो हरति स्वगन्धेन अपसारयतीति । हृ + क्विप् । तुगागमश्च । ) क्षुद्रदुरालभा । इति राजनिर्घण्टः ॥

फणी, [न्] पुं, (फणास्त्यस्येति । फणा + "व्रीह्यादिभ्यश्च ।"५ । २ । ११६ । इति इनिः ।) सर्पः । इत्यमरः ॥ (यथाच सुश्रुते कल्पस्थाने ४ अध्याये ।
"ज्ञेया दर्व्वीकराः सर्पाः फणिनः शीघ्रगामिनः ।
मण्डलैर्व्विविधैश्चित्राः पृथवो मन्दगामिनः ॥"